# 2023

## SANSKRIT — GENERAL

**Paper : GE/CC-4**

**(Sanskrit Grammar)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Section - A

**Unit : I**

**(Marks : 20)**

1. अधोलिखितयोः कस्य***चिदेकस्य*** उत्तरं प्रदेयम्।

   (a) कः प्रत्याहारः? प्रत्याहारः कथं क्रियते? सर्वं स्पष्टत उपस्थाप्यताम्। 2+2+6

   (b) प्रयत्नः कतिविधः? भिन्नभिन्नवर्णानां प्रयत्नः विस्तरश उपपाद्यन्ताम्। 2+8

2. निम्नलिखितेषु ***पञ्चानां*** प्रश्नानाम् उत्तरं संक्षिप्ततया लेखनीयम्। 2×5

   (a) कति माहेश्वरसूत्राणि वर्तन्ते?

   (b) केन प्रत्याहारेण निखिलव्यञ्जनानां बोधो भवति?

   (c) पदसंज्ञाविधायकं सूत्रं किम्?

   (d) केषां वर्णानाम् उत्पत्तिस्थानं कण्ठः?

   (e) द्वयोः अनुनासिकवर्णयोः उल्लेखं कुरु।

   (f) किं इत्संज्ञाविधायकं सूत्रम्?

   (g) संहितायाः लक्षणं किम्?

### Section - B

**Unit : II**

**(Marks : 10)**

3. अधोलिखितेषु ***पञ्चानां*** प्रश्नानाम् उत्तरं **संस्कृतभाषया देवनागरीलिप्या** च लेखनीयम्। 2×5

   (a) उद् स्थानम्– इति सन्धौ सन्धिविधायकं मूलसूत्रम् उल्लिख्यताम्।

(b) किं नाम आम्रेडितम्?

(c) "तन्मात्रम्' इति पदस्य सन्धिविच्छेदः करणीयः।

(d) 'मोऽनुस्वारः'– इति सूत्रस्य कोऽर्थः?

(e) सन्धौ 'तच्छिवः'– इत्यस्य किं वैकल्पिकं रूपं भवति?

(f) षट् + आननः – इत्यस्य सन्धिकार्यं प्रदर्श्यताम्।

(g) 'पदान्ताद्वा'– सूत्रस्य उदाहरणद्वयं लिख्यताम्।

**Section - C**

**Unit - I**

**(Marks : 35)**

4. अधोलिखितयोः कस्य***चिदेकस्य*** उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्।

(a) कः प्रातिपदिकार्थः? लघुसिद्धान्तकौमुदीमनुसृत्य व्याख्यायताम्। 2+8

(b) लघुसिद्धान्तकौमुदीमनुसृत्य सोदाहरणकरणकारकस्वरूपं व्याख्यायताम्। तत्र तृतीयाविभक्तिविधायकं सूत्रं किम्? 8+2

5. अधोरेखाङ्कितेषु यथामति ***त्रयाणां*** सकारणं सूत्रोल्लेखपूर्वकं कारकविभक्तिप्रयोगः **संस्कृतभाषया देवनागरीलिप्या** च निर्णेयः। 2×3

(a) <u>तण्डुलान्</u> ओदनं पचति।

(b) <u>वृक्षात्</u> फलानि पतन्ति।

(c) <u>पितृभ्यः</u> स्वधा।

(d) शिष्यः <u>वेदम्</u> अधीते।

(e) <u>कटे</u> आस्ते।

6. निम्नलिखितेषु यथामति ***त्रयाणां*** संशोधनं संस्कृतभाषया देवनागरीलिप्या च कार्यम्। 1×3

(a) शिशुः चन्द्रः पश्यति।

(b) तिलाय तैलम्।

(c) रामेण बाणाय हतो वाली।

(d) वृक्षैः अवचिनोति फलानि।

(e) पितरि स्मरति।

7. अधोलिखितयोः कस्य***चिदेकस्य*** उत्तरं प्रदेयम्।

(a) अधिकरणकारकविधायकं मुख्यसूत्रं किमस्ति? लघुसिद्धान्तकौमुदीमनुसृत्य अधिकरणकारकस्वरूपं व्याख्यायताम्। 2+8

(b) लघुसिद्धान्तकौमुदीमनुसृत्य सम्प्रदानकारकस्वरूपं व्याख्यायताम्। तत्र चतुर्थीविभक्तिविधायकं सूत्रं किमस्ति? 8+2

8. निम्नप्रदत्तेषु यथाभिलाषं ***प्रश्नद्वयं*** समाधेयम्। 3×2

(a) किं नाम सम्बोधनम्? 'सम्बोधने च'– इति सूत्रस्य उदाहरणमेकं लिख्यताम्।

(b) किम् अकथितं कर्म? केषां धातूनां योगे अकथितं कर्म भवति?

(c) अभिहिते तु कर्मणि प्रथमा। – व्याख्यायताम्।

***अथवा,***

निम्नप्रदत्तेषु यथाभिलाषं ***विषयद्वय***माश्रित्य टीका कार्या। 3×2

(a) शेषार्थः

(b) अनभिहितम्

(c) ईप्सिततमम्।

---